अष्टादशः पाठः

# महाराजः छत्रसालः

**''वीरभोग्या वसुन्धरा'' इत्याभाणकं प्रसिद्धम् अस्ति। इयं भारतभूमिः सनातनकालादेव वीरप्रसूरिति सर्वसम्मतम्। यदा-यदा वसुन्धरेयम् आक्रमणकारिभिः, लुण्ठकैः भूरिभारभराक्रान्ता भवति तदा-तदा भगवदनुग्रहेणैव वीरपुरुषाः समवतीर्य मातृभूमिं परतन्त्रताजालात् मोचयित्वा सनातनम् आदर्शं स्थापयन्ति। परतन्त्रताकाले यैः शौर्यं, बलिदानं, पराक्रमं, राष्ट्रभक्तिञ्चाधृत्य अनुकरणीयं जीवनं यापितं तेषु महाराजः छत्रसालः अद्वितीयः। एतस्यैव महापुरुषस्य जीवनमधिकृत्य पाठोऽयं प्रस्तूयते।**

सम्प्रति अस्माकं देशोऽयं स्वतन्त्रोऽस्ति। किन्तु स्वतन्त्रताप्राप्त्यै परतन्त्रताकालादेव समये-समये राष्ट्रभक्तैः अनेकैः वीरपुरुषैः स्वस्य जीवनस्य आहुतिरपि प्रदत्तेति । गौराङ्गवैदेशिकेभ्यः पूर्वं यदा भारतदेशः मुगलैः आक्रान्तः आसीत् तदा मुगलैः सह ये पराक्रमशालिनः युद्धं कृतवन्तः तेषु महाराजशिववीरः, महाराणाप्रतापः, राज्ञीलक्ष्मीबाई, वीरपुङ्गवाः छत्रसालप्रभृतयः अप्रतिमाः योद्धारः आसन्। एते मातृभूमिं पराधीनतापाशात् विमुक्तये स्वीयं सर्वस्वं हुतवन्तः।

''बुन्देलकेसरी'' इति विख्यातस्य छत्रसालस्य जन्म (1649) एकोनपञ्चाशदुत्तरषोडशशततमे ईस्वीये मध्यप्रदेशस्य 'टीकमगढ़' जनपदस्य मयूरपर्वतीयक्षेत्रे (मोर पहाड़ी) लिधौराग्रामसमीपे अभ्वत । छत्रसालस्य मातर्नाम लाल कुँवर (सारन्धादेवी)पितुर्नाम च श्रीचम्पतरायः इत्यासीत्। अयं वीरः बाल्यकालादेव भारतमातरं मुगलशासनात् विमोक्तुं प्रयतते स्म। यथासमये एतदर्थम् एव छत्रसालः शिववीरमहाराजम् अपि मिलितवान्। तस्मै शिववीरोऽपि सर्वविधं साहाय्यं कर्तुं वचनम् अयच्छत्। तथा च स्वतन्त्रतायै योद्धुं स्वाशीर्वादस्वरूपं ''भवानीति'' नामकं कृपाणम् अपि दत्तवान्।

औरङ्गजेबस्य, अन्येषां राज्ञां च शक्तिम् अविगणय्य जनसहयोगेन छत्रसालः युद्धं कृतवान् विजयश्रियम् अपि अवाप्तवान्। असौ सेनानी सर्वप्रथमं युद्धे चित्रकूटात् गोपाचलनगरं (ग्वालियरम्) यावत् तथा च कालपीतः गढ़ाकोटा यावत् निजं प्रभुत्वं संस्थापयामास। अनन्तरं सः पन्नाजनपदस्य गोंडजातीयान् राज्ञः पराजित्य पन्नानगरं राजधानीम् अकरोत्।

प्रसिद्धः स्वामिप्राणनाथः अस्य गुरुः आसीत्। प्रसन्नः गुरुः छत्रसालं ''महाराज'' इत्युपाधिना विभूष्य आशीर्वादं प्रदत्तवान्, यत् -

*राज्ये त्वदीये नृप ! छत्रसाल ! क्षोणिस्सदा कम्पमयी विभातु।*
*अश्वः त्वदीयः समियात् तु यत्र, भोस्तत्र साफल्यमवाप्नुहि त्वम्॥*

यदा औरङ्गजेबः दक्षिणभारते व्यापृतः आसीत् तदा युद्धकौशलेन असौ बघेलखण्ड-मालव-राजस्थान-पञ्चाम्बुप्रदेशपर्यन्तं क्षेत्रं स्वाधिपत्ये कृतवान्। मुगलशासकः इमं मानिनं प्रान्ताधिपतित्वं ''सूबेदारी'' इति दातुम् ऐच्छत् तदा अयं न्यषेधयत्। एकदा महोबा - ''जैतपुरनगरयोः मुगलशासने जाते सत्ययं पेशवाबाजीरावाय सहायतार्थम् एकं पत्रं प्रेषितवान्। बाजीरावसाहाय्येन सः पराजितं भूभागं विजितवान्। विजयेन आह्लादितोऽयं पेशवाबाजीरावम् औरसपुत्रमिव मत्वा विजितराज्यस्य तृतीयभागं तस्मै सहर्षं प्रादात्।''

छत्रसालस्य शौर्येण, राष्ट्रभक्त्या, उदारतया च प्रभावितो हिन्दीभाषाया: महाकवि: भूषण: ''छत्रसालदशक'' इति वीररसनिबद्धां काव्यरचनाम् अकरोत् । छत्रसाल: काव्यसाहित्यशास्त्रसम्मानार्थं भूषणमहाकवे: शिविकाम् अपि उत्तोलयत् । द्व्यशीतिवर्षस्य अवस्थायाम् एकत्रिंशदुत्तरसप्तदशशततमे (1731) खीस्ताब्दे ''मऊसहानिया'' इत्यस्य तालपरिसरे एष: क्षणभङ्गनिष्ठं शरीरम् अत्यजत् । अधुना स: पाञ्चभौतिकशरीरेण नास्ति परन्तु यश: शरीरेण सर्वदा अस्मान् भारतीयान् प्रेरयन् राष्ट्रभक्तिभावं च शिक्षयन् तिष्ठति एव । अयं देश: जन्मभूमिसंरक्षकस्य महापराक्रमशालिन: छत्रसालस्य सदैव ऋणी अस्ति । विजयतेतरां महाराज: छत्रसाल: ।

## शब्दार्थ:

सम्प्रति - इस समय । वीरपुङ्गव: - वीरों में श्रेष्ठ । पराधीनतापाशात् - गुलामी के जाल से । विमुक्तये - मुक्ति के लिये । सर्वस्वम् - अपना सब कुछ । हुतवन्त: - जला दिया । विमोक्तुम् - मुक्त करने के लिये । प्रयतते स्म - प्रयास कर रहा था । एतदर्थम् - इसके लिये । मिलितवान् - मिला । सर्वविधम् - सब प्रकार का । साहाय्यम् - सहायता । कर्त्तुम् - करने के लिये । अयच्छत् - दिया । अन्येषाम् - दूसरों के । अविगणय्य - बिना गणना करके । अवाप्तवान् - प्राप्त किया । प्रभुत्वम् - शासकत्व । संस्थापयामास - स्थापित किया । पराजित्य - पराजित करके । विभूष्य - विभूषित करके । त्वदीये - तुम्हारे । क्षोणि: - पृथिवी । विभातु - प्रकाशित हो । समियात् - जाये (गमन करे) । अवाप्नुहि - प्राप्त करो । व्यापृत: - व्यस्त । ऐच्छत् - इच्छा की, चाहा । न्यषेधयत् - मना कर दिया । प्रादात् - दे दिया । शिविकाम् - पालकी को । उत्तोलयत् - उठाया । अत्यजत् - त्याग दिया । क्षणभङ्गनिष्ठम् - क्षण भर में नष्ट होने वाला । यश:शरीरेण - यशरूपी शरीर से । शिक्षयन्- शिक्षा (सीख) देते हुए । एव - ही । विजयतेतराम् - विजयी हों ।

## अभ्यास:

**1. एकपदेन उत्तरं लिखत -**

(क) छत्रसालस्य पितु: नाम किम् ?

(ख) छत्रसालस्य जन्म कस्मिन् ग्रामे अभवत् ?

(ग) 'बुन्देलकेसरी' इति नाम्ना क: प्रसिद्ध: ?

(घ) शिववीर: छत्रसालाय किं नामकं कृपाणम् अयच्छत् ?

(ङ) भूषण: कस्या: भाषाया: महाकवि: आसीत् ?

**2. एकवाक्येन उत्तरं लिखत -**

(क) योद्धार: किमर्थं सर्वस्वं हुतवन्त: ?

(ख) छत्रसालस्य जन्म कस्मिन् जनपदे अभवत् ?

(ग) छत्रसाल: कस्य शिष्य: आसीत् ?

(घ) कान् पराजित्य छत्रसाल: पन्नानगरं राजधानीम् अकरोत् ?

(ङ) गुरुणा छत्रसाल: केन उपाधिना विभूषित: ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) के-के वीरा: भारतस्वतन्त्रतायै मुगलै: सह अयुध्यन् ?

(ख) बाल्यकालादेव छत्रसाल: किमर्थं प्रयतते स्म ?

(ग) छत्रसालस्य साहित्यिकं प्रेम कथं ज्ञायते ?

5. **प्रदत्तशब्दै: रिक्तस्थानानि पूरयत –**

(छत्रशालदशक, द्व्यशीति:, छत्रसाल:, सूबेदारी, भवानी)

(क) मुगलशासक: इमं ............................ इति दातुम् ऐच्छत्।

(ख) शिववीर: तस्मै .......................... इति नामकं कृपाणं समर्पितवान्।

(ग) भूषण: ............................. इति काव्यरचनाम् अकरोत्।

(घ) भारतमातृभू: संरक्षक: ............................... आसीत्।

(ङ) छत्रसाल: .................................. वर्षपर्यन्तम् अजीवत्।

6. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) छत्रसालस्य मातुर्नाम | 1649 |
| (ख) छत्रसालस्य जन्मख्रिस्ताब्द: | पन्नानगरम् |
| (ग) छत्रसालस्य राजधानी | सारन्धादेवी |
| (घ) छत्रसालस्य जन्मस्थलम् | 1731 |
| (ङ) छत्रसालस्य निधनख्रिस्ताब्द: | ककरकचनयग्राम: |

7. **निम्नलिखितक्रियापदानां धातुं, लकारं, पुरुषं, वचनं च लिखत –**

| क्रियापदम् | धातु: | लकार: | पुरुष: | वचनम् |
|---|---|---|---|---|
| यथा – आसीत् | अस् | लङ् लकार: | प्रथमपुरुष: | एकवचनम् |
| (क) प्रयतते | | | | |
| (ख) अयच्छत् | | | | |
| (ग) ऐच्छत् | | | | |
| (घ) तिष्ठति | | | | |

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत –**

| पदम् | सन्धिविच्छेद: | सन्धिनाम |
|---|---|---|
| यथा – मातुर्नाम | मातु: + नाम = | विसर्गसन्धि: |
| (क) पराधीनता | | |
| (ख) गोपाचल: | | |
| (ग) देशोऽयम् | | |
| (घ) इत्यासीत् | | |

8. **अधोलिखितपदानां समासविग्रहं कृत्वा समासनाम लिखत -**

(क) महाराज:

(ख) क्षेत्रपति:

(ग) वीरपुरुष:

(घ) राष्ट्रभक्ति:

(ङ) यश:शरीरम्

9. **उदाहरणानुसारं पर्यायशब्दान् लिखत -**

**उदाहरणम् - केसरी (रिन्) - सिंह:**

(क) स्वतन्त्र: - ................................

(ख) कृपाण: - ................................

(ग) युद्धम् - ................................

(घ) तनय: - ................................

(ङ) जन्मभूमि: - ................................

10. **रेखाङ्कितपदान्याधृत्य प्रश्ननिर्माणं कुरुत -**

(क) **स्वातन्त्र्यनायका:** स्वकीयं सर्वस्वं हुतवन्त:।

(ख) छत्रसाल: **शिववीरं** महाराजं मिलितवान्।

(ग) अयं **बाल्यकालात्** एव भारतमातरं विमोक्तुं प्रयतते स्म।

(घ) छत्रसाल: **भूषणस्य** शिविकाम् उत्तोलयत्।

(ङ) **'मऊसहानिया' स्थले** स: प्राणान् अत्यजत्।

## योग्यताविस्तार: -

- महाराजछत्रसालसदृशा: येऽन्ये स्वातन्त्र्यनायका: मध्यप्रदेशे अभवन् तेषां नामानि लिखत।